दिनांक: **मंगलाबाई भागवत फाऊंडेशन** दशमी

पूर्वपरीक्षा २०२६

अवधि : होराद्वयम् । संस्कृत (संयुक्त) गुणाका:- **40**

---

**सूचना : i) सूचनानुसारेण आकृतय: आरोखितव्या : ।**

**ii) आकृतीनाम् आरेखनं मसीलेखन्या कर्तव्यम् ।**

**iii) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।**


**iv) लेखन सुवाच्यं स्पष्टं लेखन नियमानुसारं च भवेत् ।**

---

**प्रथम : विभाग :- सुगमसंस्कृतम् । (६)**

**प्र. 1 अ) चित्रं दृष्ट्वा नामानि लिखत । (४ त:३)** **(3)**




**आ) सङ्ख्या: अक्षरै:/अङ्कै: लिखत । (३ त:२)** **(2)**

i) नवनवति: ii) ३५ iii) पञ्चाशत्

**इ) समय स्तम्भमेलनं कुरुत ।** **(1)**

i) नवनवति: ii) उप iii) पञ्चाशत्

| अ | ब |
|---|---|
| i) दशोन षट्वादनम् | i) ८.१० |
| ii) दशाधिक अष्टवादनम् | ii) १०.८ |
| | iii) ५.५० |

**द्वितीय : विभाग :- गद्यम् । (१४)**

**प्र. 2 अ) गद्यांशं पठित्वा निर्दिष्टा:कृती:कुरुत ।** **(4)**

एकदा पृश्रुराज: स्वराज्ये भ्रमणम् अकरोत् । भ्रमणसमये तेन दृष्टं यत् प्रजा: अतीव कृशा: अशक्ताश्च । ता: प्रजा: पशुवज्जीवान्ति । निकृष्टान्नं खादान्ति । तद् दृष्टवा राजा चिन्ताकुल: जात:। तदा पुरोहितोऽवदत्, 'हे राजन्, धनधान्यादि सर्वं वस्तुजातं वस्तुत: वसुन्धराया: उदर एव वर्तते । तत्प्राप्तुं यतस्व ।'

तदा पृथभूपेन तदर्थं धनु: सज्जीकृतम् । तदा भूमि: स्त्रीरुपं धृत्वा तस्य पुरत: प्रकटिता अभवत् अवदत् च, 'हे राजेन्द्र ! तव पिता दु:शासक: वेनराज: राजधर्मस्य पालनं नाकरोत् । तदा मया चोरलुण्ठकभयात् धनधान्य पुष्पफलानि मम उदरे निहितानि । त्वंतु प्रजाहितदक्ष:नृप: । यदित्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि । अत:धनु:त्यज । खनित्राणि, हलान्, कुददालकानि लवित्राणि च हस्ते गृहित्वा प्रजाजनै: सह कृषिकार्यं कुरु ।' भूमातु: उपदेशं मनसि निधाय पृथुवैन्य: नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत् । वृष्टिजलसञ्चयं कृत्वा जलज्यवस्थापनम् अकरोत् ।

i) अवबोधनम् (३त:२) **(2)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।**

भूम्या धनधान्य पुष्प फलानि स्व–उदरे निहितानि यत: ..............

i) वेनभूप: राजधर्मस्य पालनं न अकरोत् ।

ii) भूमि: स्वभावेन कृपणा आसीत् ।

**ख) वाक्य पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत । (1)**

कृषिकार्येण भूमि: प्रसन्ना भवति ।

**ग) एष: गद्यांश: कस्मात् पाठात् उद्धृत: ?**

**२) शब्दज्ञानम् । (३त:२) (2)**

**क) गद्यांशात् २ पूर्वकालवाचक वासतुसाधित–ल्यवन्स अव्यये चित्वा लिखत । (1)**

**ख) विशेषण – विशेष्ययो : मेलनं कुरुत । (1)**

| अ | ब |
|---|---|
| i) राजा | i) प्रसन्ना: । |
| ii) प्रजा : | ii) चिन्ताकुल: । |
| | iii) कृशा: । |

**ग) सान्धिविग्रहं कुरुत । पशुवज्जीवन्ति ।**

**आ) गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत । (4)**

एकास्मिन् दिने शङ्कर: स्नानार्थं पूर्णानदींगत: । यदास: स्नाने मग्न:। तदा तत्र एक:नक्र: आगत: । नक्र: झटिति तस्य पादम् अगृण्हात् । तदा शङ्कर उच्चै: आक्रोशात्। 'अम्ब! त्रयस्व । नक्रात् त्रायस्व ।' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्कर: मातरम् आर्ततया प्रार्थयत–'अम्ब, इत:परम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि। अधुना वा देहि अनुमतिम् । चेतसा सा अनिच्छन्ती अपि विवशा माता अवदत्– वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु । मम अनुमति: ओस्ति इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्कर: नक्राद् मुक्त: । स नदीतीरम् आगत्य मातु: चरणौ प्राणमत् ।

अनन्तरं शङ्कर: मातरं सन्यासस्य महत्वम् अवाबोंधयत् । संन्यासी न केवलम् एकस्या: पुत्र: । विशालं जगद् एव तस्य गृहम् । मात: यदा त्वं स्मरिण्यासि तदा एव त्व त्वत्सत्समीपमागमिष्यामि। इति मात्रे प्रतिश्रुत्य स: गृहात् निरगच्छत्। तत:गोविन्दभगवत्पादानां शिष्यो भूत्वा.... स: सर्वाणि दर्शनानि अपठत् । तेभ्य: संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।

षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।

**१) अवबोधनम् । (३त:२)** **(2)**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** **(1)**

i) आर्याग्वा पुत्रं .............. गृहीतम् अपश्यत् (नक्रेण/मत्स्येन)

ii) शङ्कर: संन्यासग्रहणार्थम् ............ अनुमतिम् ऐच्छत् । (पितु:/मातु:)

ख) क: कं वदति ? 'यथा तुभ्यं रोचते, तथैव भवतु ।'

ग) पूर्णवाक्येन उत्तरं लिखत । शङ्कर: मातरं किम् अवाबोधयत् ?

**२) जालरेखाचित्रं पूरयत । शङ्कराचार्य :**

| ...मुनि:अभ्यगात् | ...कृतवान्भाष्यम् | ...द्वादशे | अष्टवर्षे..... |
|---|---|---|---|

**इ) गद्यांश : पठित्वा सरलार्थं लिखत । (२त:१)** **(4)**

i) सूत:–धृता:प्रग्रहा: । अवतरतु आयुष्मान् ।

दुष्यन्त: (अवतीर्य) सूत, विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नामा इदं तावतत्गृह्यताम् ।

(इति सूतस्याभरणानि धनुश्चोपनीय)

सूत: – तथा (इति निष्क्रान्त: ।)

ii) नदी (शुतुद्री):–कथं माता न करोति साहाय्यं स्वपुत्रस्य ? साधु मानव श्रेष्ठ साधु ! किन्तु, काच्चित् तव वंशजा: मनुजा: तवेदं वचनं विस्मरिष्यान्ति ?

विश्वमित्र :–नहि मात: नैतत् शक्यम् । सर्वा सरित: सुखं वहन्तु ।

**ई) माध्यम भाषया उत्तरं लिखत । (२त:१)** **(2)**

i) महर्षि: कणाद: परमाणुविषये किं प्रतिपादितवान् ?

ii) काकेन क: उपाय: उक्त: ?

**तृतीय विभाग :– पद्यम् । (१०)**

**प्र. 3 अ) पद्यांशं पठित्वा निर्दिष्टा:कृती:कुरुत । (५त:४)** **(4)**

विद्या नाम नरस्य रुममधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यश:सुखकरी विद्या गुरुणां गुरु: ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं विद्याविहीन: पशु: ।।
निन्दन्तु नीति निपुणा यदि वा स्तुवन्तु
लक्ष्मी : समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथ: प्रविचलन्ति पदं न धीरा : ।।

क) पूर्णवाक्येन उत्तरत्त राजसु किं न पूज्यते ?

ख) विशेषण – विशेष्ययो : मेलनं कुरुत ।

| अ | ब |
|---|---|
| i) न्याय्यात् | i) दैवतम् । |
| ii) परम् | ii) रुपम् । |
| | iii) पथ : । |

**ग)जालरेखाचित्रं पूरयत ।** **(1)**

**विद्या**

| | | | |
|---|---|---|---|
| प्रच्छन्नगुप्तं | गुरुणां<br>गुरु: । | पर<br>दैवतम् । | नरस्य<br>अधिकं |

**घ) षष्ठी विभक्ते: द्वे रुपे पद्यांशात् चित्वा लिखत ।**

**च) सान्धि विग्रहं कुरुत । अद्यैव –**

**आ) पद्ये शुद्धे पूर्णेच लिखत । (३त:२)** **(4)**

i) यादृशं ........... फलम् ।।

ii) वैद्यराजं ........... <u>धनानिच</u> ।।

iii) आत्मनो ........... साधनम् ।।

**इ) माध्यमभाषया सरलार्थं लिखत । (२त:१)** **(2)**

i) अद्ययावाद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्व **<u>विधासु विद्यार्थं</u>** वाचनमुपकारकम् ।।

ii) वाचन ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दु:खहरणं हितं सद्ग्रन्थवाचनम् ।।

**चतुर्थ विभाग :– भाषाभ्यास : । (१०)**

**प्र. 4 अ) पृथक्करणम् ।** **(2)**

i) मञ्जूषात: नामानि सर्वनामानि च पृथस्कुरत । (५ त:४)

| | | | | |
|---|---|---|---|---|
| नाम | - | - | - | - |
| सर्वनाम | - | - | - | - |

(मञ्जुषा – अयम्, नर:, भयम्, धनु :, सर्वाणि)

ii) मञ्जूषातः क्रियापदानि धातुसाधित विशेषणानिच पृथवकुरुता । (५ तः४)

| क्रियापदम् | - | - | - | - |
|---|---|---|---|---|
| धातुसाधित विशेषणम् | - | - | - | - |

(मञ्जुषा – कृतः, कुर्महे, पाठ्यः, पठसि, ददामि)

आ) निर्दिष्टा : कृतीः कुरुता । (४ तः५)

i) सङख्या/क्रम/आवृत्तिवाचकस्य योग्य पर्यायं चित्वा वाक्यं पुनर्लिखत । (३तः२)

क) प्रयागे........ नदीनां सङ्गमः अस्ति । (त्रयाणाम्, तिसृणाम्)

ख) श्रीकृष्णः देवक्याः ............ अपंत्यम् । (अष्टमभ्/अष्ट)

ग) दिनस्य ............. भोजनं कुर्मः । (द्वि/द्वितीयः)

**२) समासविग्रहाणां समासनामभिः सह मेलनं कुरुत । (६तः४)** **(2)**

| **समास विग्रह** | **समासनाम** |
|---|---|
| i) गृह गृहे । | i) उपपद तत्पुरुष : । |
| ii) ईश्वर निष्ठा यस्यसः । | ii) अव्ययीभावः । |
| iii) प्रिया भाषा । | iii) बहुव्रीहिः । |
| iv) न शक्यम् । | iv) कर्मधारयः । |
| v) क्षेत्रस्य पतिः । | v) नञ् तत्पुरुषः । |
| iv) पर्वते तिष्ठाति इति । | iv) षष्ठी तत्पुरुषः । |

**३) मञ्जुषातः समानार्थक शब्दान्/विरुद्धार्थक शब्दान् चित्वा लिखत ।** **(2)**

i) अरण्यम् : ............... iii) विहीन X ...............

ii) रासभ : ............... iv) वार्धक्ये X ...............

(मञ्जूषा–सहितः, गहनम्, यौवने, मईभः)

**४) योग्य पर्याय चित्वा लिखत । (३तः२)** **(2)**

i) बध्यन्तो शुकसारिकाः (कर्तुवाच्यम्/कर्मवाच्यम्)

ii) अवतरतु ....... लोके । (त्वम्/भवान्)

iii) सन्मित्रं ............... लोके । (दुर्लभः/दुर्लभम्)

**इ) विशिष्ट विभक्ते : उपयोगं कृत्वा वाक्य निर्माणं कुरुत । (४तः२)** **(2)**

i) कथ् ii) नमः iii) कृते iv) स्निह्

✲✲✲✲✲✲